10. Hafta

# वृद्धस्य कौशलम्

एकदा कश्चित् वृद्धो ग्रामान्तरं गच्छन् पथि श्रान्तः अभवत्। अतः स विश्रमाय पार्श्वस्थितस्य चूततरोः मूलमगच्छत्।

तस्मिन् वृक्षे पचेलिमानि फलान्यवर्तन्त। वृद्धस्य तेषु स्पृहा जाता। परं स वृक्षमारुह्य तानि ग्रहीतुं  नाशक्नोत्।

दिष्ट्या तस्मिंस्तरौ केचित् वानराः फलानि खादन्तः स्थिताः। तानवलोक्य वृद्धः प्रहर्षं गतः। स किमकरोत्? स कतिचित् उपलानादाय वानरान् लक्ष्यीकृत्य प्राक्षिपत्। वानराः कुपिताः कानिचित् फलान्यवचित्य वृद्धं प्रति प्राक्षिपन्। वृद्धः सहर्षं तान्यादाय स्वाभीष्टदेशं गतः। पश्यत! वृद्धस्य कौशलम्।